# Rigvedakrita Shiva Stuti

# ઋગ્વેદકૃતા શિવસ્તુતિઃ

## Document Information

Text title : Rigvedakrita Shiva Stuti

File name : RRigvedakRRitAshivastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshAkhyaH dvAdashamAMshaH | adhyAyaH 3

RigvedayajurvedakRitastutiH | 12-25 ||

Latest update : December 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2024

*sanskritdocuments.org*

# ઋગ્વેદકૃતા શિવસ્તુતિઃ

(શિવરહસ્યાન્તર્ગતે ઈશાખ્યે)

ઋગ્વેદઃ ઉવાચ ।

યઃ સોમો જનિતા દેવો મતીનાં ચ દિવસ્તથા ।
પૃથિવ્યાજનિતા સોમઃ સોમોઽગ્નેર્જનિતા તથા ॥ ૧૨॥

સૂર્યસ્ય જનિતા સોમ ઇન્દ્રસ્ય જનિતા શિવઃ ।
વિષ્ણોર્વૈ જનિતા સોમઃ સર્વેષાં જનિતા હરઃ ॥ ૧૩॥

આષાઢઃ શ્રીમહાદેવઃ પિતાસૌ મરુતામપિ ।
વિશ્વસ્ય ભેષજો રુદ્રઃ સુધન્વા સખિષુ પરઃ ॥ ૧૪॥

નમોભિસ્તં પ્રપદ્યામિ રુદ્રમધ્વરનાયકમ્ ।
ભૂર્ણિરેવ વિરૂપાક્ષઃ શિવો મીઢુષ્ટમો હરઃ ॥ ૧૫॥

શમ્ભો ત્વં પ્રતિમત્વં મે માતાસિ ચ પિતાસિ મે ।
તેન રાયસહસ્રાઢ્યં ભવેન્મમ સદા મુદા ॥ ૧૬॥

તવ સોમવ્રતં દેવ તન્વા ચ મનસા સહ ।
કાન્તા તે શિવલિઙ્ગાર્ચા પશ્યેમ શરદઃ શતમ્ ॥ ૧૭॥

તવૈવ શિવ નૈવેદ્યં તદશ્યામ સદા મુદા ।
ભસ્મરુદ્રાક્ષસહિતા જીવામ શરદઃ શતમ્ ॥ ૧૮॥

સદા શિવકથાં શ્રુત્વા મોદામ શરદઃ શતમ્ ।
શિવસ્ય લિઙ્ગં દૃષ્ટ્વૈવ નન્દામ શરદઃ શતમ્ ॥ ૧૯॥

શિવભક્તાઃ સદા શાન્તા ભવામ શરદઃ શતમ્ ।
શિવસ્યૈવ સદા વાચા ચારુનામ મનામહે ॥ ૨૦॥

પિતરં ચ મહાદેવં દૃશેયં માતરં શિવમ્ ।
ચારુચિત્રં લિઙ્ગરૂપં ભજધ્વં પરમેશ્વરમ્ ॥ ૨૧॥

અકામેન ભજન્તીશં ધિયા પાવનયા સુરાઃ ।
પુરીષજિહ્વાસ્તે સર્વે ભવન્તિ નિરપત્રપાઃ ॥ ૨૨॥

ઈશાદસ્ય ભુવનસ્ય જન્મ સદા પશ્યન્તિ સૂરયઃ ।
હે દેવાઃ પ્રિયમેધાસઃ સમર્ચન્તુ મહેશ્વરમ્ ॥ ૨૩॥

ત્રિપુરારિં મહાદેવં ત્રિસત્યં પ્રવદામ્યહમ્ ।
અયં ગાથપતિઃ સ્માવો જયં મેધપતિઃ શિવઃ ॥ ૨૪॥

સર્વેશં તં મહાદેવં ઉતામૃતપતિં શિવમ્ ।
ભુવિ મોક્ષસ્ય દાતારં ભજેઽહં સત્પતિં શિવમ્ ॥ ૨૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋગ્વેદકૃતા શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઈશાખ્યઃ દ્વાદશમાંશઃ । અધ્યાયઃ ૩ ઋગ્વેદયજુર્વેદકૃતસ્તુતિઃ । ૧૨-૨૫ ॥

- .. shrIshivarahasyam . IshAkhyaH dvAdashamAMshaH . adhyAyaH 3 RRigvedayajurvedakRRitastu
. 12-25 ..

Notes:

Ṛgveda ઋગ્વેદ; at the site of DakṣaYajña દક્ષયજ્ઞ, a eulogy in favor of Śiva શિવ.

Proofread by Ruma Dewan

*Rigvedakrita Shiva Stuti*

pdf was typeset on December 28, 2024

Please send corrections to *sanskrit@cheerful.com*